सारस्वतसमुन्मेषः

(संस्कृतकाव्यम्)

प्रणेता

डा० विन्ध्येश्वरीप्रसाद मिश्र

'विनयः'

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली-११००५९

सारस्वत-समुन्मेषः

(कवितासंग्रहः)

प्रणेता :
डा० विन्ध्येश्वरीप्रसाद मिश्रः 'विनयः'
एम० ए०, पीएच० डी०
डा० हरिसिंहगौरविश्वविद्यालयस्य
संस्कृत-विभागे प्रवक्ता
सागरः (म०प्र०)

१९८५

प्रकाशिका
देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९
(भारतम्)

सारस्वत-समुन्मेषः

(संस्कृतकवितासग्रहः)

प्रणेता : डा० विन्ध्येश्वरीप्रसाद मिश्र 'विनयः'

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९

मुद्रकः : देववाणी प्रिण्टर्स
उत्तम नगर, नयी दिल्ली-११००५९

संस्करणम् : प्रथमम् १९८५

मूल्यम् : द्वादश रूप्यकाणि (पेपरबैक संस्करणस्य) रु० १२-००
विंशति रूप्यकाणि (पुस्तकालय संस्करणस्य) रु० २०-००

वितरकः : देववाणी-प्रकाशनम्
६, वाणी-विहारः, नयी दिल्ली-११००५९

Sārasvatasamunmeṣaḥ
(Collection of Sanskrit Poems)

Author : Mishra, Vindhyeshwari Prasad 'Vinaya'

Publisher : Devavani Parished, Delhi
6, Vani Vihar, New Delhi-110059

Printer : Dev Vani Printers
Uttam Nagar, New Delhi-110059

Edition : First 1985

Price : Twelve only (Paper Back) Rs. 12-00
Twenty only (Library Edition) Rs. 20-00

Distributors : Devavani Prakashanam
6, Vani Vihar, New Delhi-110059

प्रास्ताविकम्

देववाणी-परिषदः सद्ग्रन्थप्रकाशनयोजनान्तर्गतं विनयोपनाम्नो डा० विन्ध्येश्वरीप्रसादमिश्रमहाभागस्य **'सारस्वतसमुन्मेषः'** इत्येतच्छीर्षकस्य काव्य-संग्रहस्य प्रकाशनं क्रियते। इतः पूर्वं परिषदा पञ्चचत्वारिंशत्प्रायाः संस्कृत-ग्रन्थाः प्रकाशिताः सन्ति।

डा० विन्ध्येश्वरीप्रसादमिश्रस्य जन्म २०१२ तमे वैक्रमाब्दे (१९५६ ई०) माघमासे शुक्लचतुर्थ्यां मध्यप्रदेशस्य **'छतरपुर'**-मण्डलान्तर्गते **'पहरा'** ग्रामे कान्यकुब्जमिश्रान्वये कात्यायनसगोत्रे पं० उमादत्तमिश्रमहाभागानां गृहे समभूत्। हिन्दी-भाषायां बाल्यादेवास्य कवितानिर्माणशक्तेः समुन्मेषः समदृश्यत। अनेन हाईस्कूलकक्षायामेव **'व्रजनिधि'**, **'कुन्तल का सम्राट्'** इत्येतदादिखण्डकाव्य-स्फुटगीतानां निर्माणं कृतम्। द्वादशकक्षायामस्य संस्कृतकाव्य-रचनाप्रसृतिरजायत। प्रतिभापरीतेन श्रीमिश्रमहाभागेन द्वादशकक्षां यावद्विज्ञानविषयमधिकृत्य पश्चाच्च कलाविषयानङ्गीकृत्य सर्वोत्कर्षत्वेन रीवाँ-विश्वविद्यालयतः स्नातकपरीक्षोत्तीर्णा। तदनन्तरं काशीहिन्दूविश्वविद्यालयतः संस्कृत-साहित्ये प्रथमश्रेण्यां स्नातकपरीक्षोत्तीर्णा। तदनु तत एव **'श्रीमद्भागवते कृष्णकथाविमर्शः'** इति विषयमधिकृत्य **'पीएच०डी०'** उपाधिः समधिगतः। अद्यत्वे डा० मिश्रमहाभागः सागरस्थे डा० हरिसिंहगौरविश्वविद्यालये संस्कृत-विभागे प्रवक्तास्ति। अस्य महानुभावस्यानेका रचना अनेकासु पत्रिकासु प्रकाशिताः सन्ति, अनेकाश्च अप्रकाशिता एव तिष्ठन्ति।

'सारस्वतसमुन्मेषे' श्रीमिश्रमहोदस्य प्रारम्भिकाः रचनाः **'गीतवल्लरी'** **'श्लोकमञ्जरी'** इतिशीर्षकद्वये वर्गीकृत्य प्रकाश्यन्ते।

गीतमञ्जर्यां सङ्कलितासु चतुर्दशरचनासु गीतपद्धतिरवलोकयितुं शक्यते। कविना एतेषु गीतेषु क्वचिद्भगवत्या भारत्याः स्तुतिः कृता, क्वचित्प्रभात-वेलायां नायिकायै प्रत्यग्रताया सन्देशो दत्तः, क्वचित्सूर्यदेवः स्तुतः, क्वचिज्जलद उपालब्धः, क्वचित्प्रावृड्गीतव्याजेन चेतसः कोमलभावना व्यक्ती कृता, क्वचित् लोकध्वनिमाश्रित्य नन्दलाल आहूतः, क्वचित्प्रीतिविधानस्य परुषत्वं संकेतितम्, क्वचिन्नववर्षागमे स्वशुभकामनाः समर्पिताः, क्वचिदात्मा उद्बोधितः, क्वचिद् गजलपद्धत्या प्रश्नाः समुपस्थापिताः, क्वचिद् विधुवदना प्रेयसी अनुनीता,

क्वचिच्चाधुनिको मानवो विध्वंसलीलां त्यक्तुं प्रतिबोधितः, क्वचिज्जीवनस्य परिभाषा विहिता, क्वचिच्च साम्प्रतिकानां यूनां गतिमवलम्ब्य सव्यङ्ग्यं स्वविचाराः प्रस्तुताः ।

श्लोकमञ्जर्यां कविना प्रथमं मङ्गलमाचरितम् । मङ्गलाचरणे प्रथमं भगवती वाग्देवी स्तुता, तदनु लक्ष्मीनारायणस्य कृपाकांक्षिता, तदनु च दुकूल-चौरस्य घटभंजनपटोः धूमालकस्य अंगुलिपर्वधृतपर्वतस्य (श्रीकृष्णस्य) स्तुति विहिता। इतः परं **'श्रीमारुतिनुति'**-शीर्षके चतुर्षु श्लोकेषु प्रपन्नपरिपालकस्य, दनुजजालदहनस्य, कपीन्द्रकुलवल्लभस्य, सततरामचन्द्रप्रियस्य, रामकीर्तनपरस्य, भक्तशिरोमणेः, रामायण-कथानटस्य श्रीमतो हनुमतः स्तुतिर्विहिता । तदनु **'नुतिषोडश्यां'** षोडशपद्यैः कविभारत्याः सरस्वत्या विशदा नुतिः समाचरिता । ततः परं **'पिकपञ्चदश्यां'** पञ्चदशमन्दाक्रान्तासु कस्याश्चित् कृष्ण-वियोगिन्याः वल्लव्याः विरहोद्गाराः पिकं प्रति प्रकाशिताः । इयं हि गोपी कृष्णाय स्वदशां निवेदयितुं पिकं मधुपुरं गमयति । ततः **'रङ्गपञ्चके'** पञ्चपद्येषु व्रज-होलिका-क्रीडा सखीमुखेन वर्णिता । अतः परं **'वसन्तोल्लासः'** इति शीर्षके नवपद्यैः वसन्तागमे उत्कण्ठिताया नायिकायाः दशा वर्णिता । ततश्च **'शरद्वर्णनम्'** सखीमुखेन वर्णितम् । **'शकुन्तविलसिते'** शुक-सारिकासंवादं तनोति कविः, यत्र स उभयोरपि परस्परम् आक्षेप-प्रत्याक्षेपान् सरससरण्या प्रस्तौति । शुकः सारिकायाः 'सारिके'ति नामैव वृथा उद्घोषयति, यतो हि सा निःसारे पलाश-पत्रे स रकामनया भ्रमति :—

श्यामे कटूक्तिकुशले वामे तव नाम सारिकेति वृथा ।
भ्रमसि पलाशपलाशे निःसारे सारकामनया ।। (पृ० २७)

अतः पर शुकं विषयीकृत्य चतस्त्रोऽन्योक्तयः प्रस्तुताः । ततश्च **'भद्रमूर्तिः'**, **'गजाननं वन्दे'**, **'स्मरामि'**, **वागीश्वरी पातु वः'**, **'सज्ज्ञानचर्चासुधा'**, **'वसतु मे वदने सुरभारती'**, **'देववाणीम्'**, **'भिन्नरुचिर्हि लोकः'**, **'न जानीमहे'**, **'विद्युल्लता'**, **'वारिदाः'** चेति समस्यानां पूर्तिर्विविधेषु वृत्तेषु अलंकृतसरण्या कृता ।

इत्थं **'श्लोकमञ्जरी'**-खण्डे पारम्परिकशैली प्रधानतोऽङ्गीकृता कविना। आर्या-स्रग्धरा-शार्दूलविक्रीडित-पृथ्वी-मालिनी-अनुष्टुप्-मन्दाक्रान्ता-पुष्पिताग्रा-वसन्ततिलका-उपेन्द्रवज्रा-द्रुतविलम्बित-हरिणी-वृत्तेषु कविना विषयानुसारं वैदर्भी गौडी वा शैली समवलम्बिता । कविना शरद्वर्णने व्रजभाषायाः कवित्त-सवैया-दोहा-छन्दांस्यपि सफलतया प्रयुक्तानि । तद्यथा :—

सवैया

यमुनावटमञ्जुनिकुञ्जघने घनसाररसावलिते विपिने,
विपिने नवनीरजगन्धयुते युतपङ्कजकोषमिलिन्दजने।
जनमानसमानिनिमानमुदे मुदिताधरपानपुटे कमने,
कमने ननु रासरसे सुविभाति शरत् सखि ! नैशसरत्पवने ॥

घनाक्षरी

कलितकदम्बनिकुरम्बकेलिकुञ्जघने
पुलिने कलिन्दजायाः लघु लघु सा विभाति।
ललितवनाली परिवेष्टिते नु वृन्दावने
नव्यामेव शोभामावहन्ती तरसा विभाति ॥
वलितनिरभ्रताभ्रतारकिततारापथ-
सञ्चारामन्दचन्द्रसारसरसा विभाति।
सरति समीरे सखि ! यामुने गभीरे नीरे
धीरे बलवीरे शरदेषा सहसा विभाति ॥

दोहा

सुतनु ! न सम्प्रति दृश्यते, सरित्पङ्किला कापि।
चापल्यान्ननु निर्गता गगनाद् घनच्छटाऽपि ॥

कविना सारस्वतसमुन्मेषे क्वचिदलंकृत-पद्धतिमनुसृत्य क्वचन च अति-स्वाभाविकतया काव्यमिषेण सुभाषित-विधानमपि कृतम्। उदाहरणार्थम्

१. कापि वा युगस्यैव वञ्चनामयी रीतिः।
२. नारि ! मृगतृष्णिकासु वारि प्राप्यते न मनाग्,
नापि सिकतासु क्वचन लभ्यते सुधास्फीतिः।
३. मञ्जुमेघावलीष्वपि क्रान्त्या भवति किमयं न वज्रसम्पातः। (पृ० १४)
४. जीवनमस्ति पिपासा। (पृ० १५)
५. पठनान्नहि फलति मूढ ! केवलमिह पद्यम् !
६. मञ्चति न हि कालो मूर्खं वा कृतविद्यम्।

७. चिन्तय कुत आयातः ?' 'कस्य कृते ?' 'कोऽहम् ?'

८. एके सन्ति निरक्षराः भुवि जना मूर्खा इति ख्यापिता-
श्चान्ये वृत्तविखण्डिता बुधजनैस्ते पामराः व्याहृताः।
एके बुद्धिविवेकशून्यहृदयाः पाशव्यकोटिं गताः
विज्ञा ये हतवृत्तदम्भभरितास्ते के न जानीमहे ॥

डा० मिश्रस्य परिचयो मह्यं डा० हरिसिंह-गौरविश्वविद्यालयस्य संस्कृत-विभागे आचार्याध्यक्षेण कविविपश्चिता सुहृद्वरेण डा० राधावल्लभ-त्रिपाठिमहाभागेन दत्तः। तेन 'गीतवल्लरी'-भागमधिकृत्य पुरोवाग्रूपेण किञ्चि-द्विलिख्यापि कविरयमनुगृहीतः। एतदर्थमहं डा० त्रिपाठिमहाभागं प्रति कृतज्ञतां व्यक्तीकरोमि।

डा० मिश्रमहाभागं संस्कृत-सपर्यार्थं समभिनन्दामि, आशासे च यदा-युष्मानसौ सारस्वतसमुन्मेषे नैरन्तर्यं लप्स्यते।

कृपालवः पाठकाः शुद्धिपत्रे निर्दिष्टाः काश्चिन्मुद्रणाशुद्धीः संशोध्य पठितुं प्रार्थ्यन्ते।

पौष शुक्ल पूर्णिमा, २०४१ वै०
७-१-१९८५ ई०

विदुषामाश्रवः

रमाकान्त शुक्लः

आर ६, वाणी-विहारः
नयी दिल्ली-११००५९

(डा० रमाकान्त शुक्ल)
महासचिवः
देववाणी-परिषद्, दिल्ली

पुरोवाक्

अथेदमुपायनीक्रियते काव्योद्यानमधुपेभ्यः भारतभूललामभूत-विन्ध्यक्षेत्रोद्भवस्य विन्ध्येश्वरीप्रसादस्य प्रतिभाप्ररोहभूता रसनिष्यन्दसिञ्चिता नूतनभावकुसुममनोज्ञा गीतवल्लरी। विनयोपाह्वो विनयनयसम्पन्नस्तरुणस्तेजस्वी नवीनः सुरगवीगायकोऽयं कतिभ्यश्चिदब्देभ्यः प्रत्यग्रशब्दकिञ्जल्कमण्डितान् स्फुटकाव्यकुसुमप्रकरान् तत्तत्संस्कृतपत्रपत्रिकादिद्वारेण सुरसरस्वत्यै समर्पयन्नास्ते, तत्स्तबकसमन्वितेयं गीतवल्लरी अर्वाचीनसंस्कृतसाहित्ये नूत्नसौरभ्यशालिनं समीरं सञ्चारयिष्यतीति विश्वसिमः।

विपश्चिदपश्चिमो हिन्दूविश्वविद्यालयस्नातको द्राक्तरोपाधिविभूषितः कविरयं सम्प्रति सागरविश्वविद्यालये अध्यापनोच्चतरानुसन्धान-संलग्नः भास्वरं स्वरं निनादयन् गीतवल्लर्यामस्यां क्वचिद् वीणावादिनीमर्चयति; क्वचिन्नवीनां प्रभातीं रचयन् प्रवीणां प्रेयसीं प्रबोधयति प्रभातकाले; क्वचिद्वैदिकस्तोमगरिमाणमाविष्कुर्वन्नर्चयति भगवतीं गायत्रीम्; क्वचिन्महाकालाट्टहासजुषं कृपकजनमनःकर्षकं भृशं भीष्मं ग्रीष्ममाविष्कुर्वन्, जलदमुपालभमानः प्रावृषमपि शब्दासारैः स्नपयन्नव्यग्रं ऋतुचित्रं समग्रीकरोति; क्वचिल्लोकगीतानां प्रभविष्णतां भावयन्नन्दलालमाह्वयति, क्वचित्परुषप्रीतिविधानजर्जरहृद्यो व्यथासन्ततिमातनोति; क्वचिद् भावसान्द्रां रसार्द्रामारचयति गजलगीतिकाम्। प्रायश आभ्यन्तरे जगति सञ्चरणशीलोऽयं नाना मनसिजदशा विवृण्वन् दृश्यते पदानां विन्यासैरुद्धरणैश्च, तथापि क्वचिद् बाह्य-जगतो विसङ्गतिमपि साक्षात्करुते।

सद्यः कोरकिता तन्वी सत्यपि गीतवल्लरीयं भविष्यस्यनेहसि गम्भीरदृष्टिविवेकच्छायाश्रिता समधिकतरं पल्लविता पुष्पिता च स्यादित्याशास्महे।

७.१.१९८५
सागरः (म०प्र०)

डा० राधावल्लभः त्रिपाठी
डा० हरिसिंहगौर-विश्वविद्यालये
संस्कृतविभागे आचार्याध्यक्षः

शुद्धिपत्रम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
३	१२	ह्लादिनि	ह्लादिनि
४	१२ अनन्तरम्	अमुद्रिता पंक्तिः	'कलरवं खगानां जातं लताऽऽलवाले' इत्थं योजनीया
७	२	···वञ्जुलवञ्जुलैः	···वञ्जुलैः
११	१२	चाकचिक्य०	चाकचक्य०
२१	२	समथः	समर्थः
२६	६	लधु	लघु
२८	२	शुकमवलयोक्य	शुकमवलोक्य
३१	१६	वुधजनस्ते	वुधजनैस्ते

गीतवल्लरी

डा० विन्ध्येश्वरी प्रसाद मिश्र : 'विनयः'

अनुक्रमः

१.	निखिलवाङ्मयदेवते ! जय	३
२.	प्रभात-गीतिः	४
३.	गायत्रीगानम्	५
४.	जलदोपालम्भगीतम्	६
५.	प्रावृड्गीतम्	७
६.	एहि नन्दलाल !	८
७.	परुषं प्रीतिविधानम्	९
८.	नववर्षगीतम्	१०
९.	उद्बोधनम्	११
१०.	कथं जातम् ?	१२
११.	वद विधुवदने !	१३
१२.	पश्य मुकुरे क्षणं नु वदनं स्वम् !	१४
१३.	क्षणिका	१५
१४.	अहो ! अद्य यूनां गतिः का नु जाता !	१६

१. निखिलवाङ्मय देवते ! जय

(गीतम्)

निखिलवाङ्मयदेवते ! जय जननि वीणावादिनि ॥ध्रु०॥

नवलधवलोत्पलदले,

चन्द्रिकाचयनिर्मले,

नवमृणालसुकोमले जय विनतवदनाह्लादिनि ॥००॥

तव करे शततन्तुवीणा,

रङ्गिणि ! त्वमपि प्रवीणा,

मुखरितां कुरु वरविपञ्चीं स्वरसहस्रनिनादिनि ॥००॥

त्वमसि दिव्या देववाणी,

जननि ! कल्याणी पुराणी,

विततघनमोहान्धकारे त्वमसि दीप्ता ह्लादिनि ॥००॥

आदिकविमुखरसितकरुणे,

व्यासकाव्यवरेण्यवरुणे,

'भास' 'दीपशिखा' दिसेवितकविकलासम्पादिनि ॥००॥

भारति ! त्वां संस्मरामः,

वयं सन्ततमानमामः,

जय सुधामाधुर्यमधुमयि ! मुदा मानसमादिनि ॥००॥

निखिलवाङ्मयदेवते ! जय जननि वीणावादिनि ॥००॥

२. प्रभात-गीतिः

नयनयुगलमुन्मीलय, शीलय कचजाले
धम्मिल्लं मञ्जु, गता रजनी मधुबाले ।।

अनुगुञ्जच्चञ्चरीकपटलीसञ्चारं,
ह्यामन्त्रयतीव सरसिजश्रीः शतवारं;
सुतनु ! सर्वतोदिक् संसरति किरणमाली,
मन्दं मन्दं नु वाति पवन इन्द्रजाली;
मुग्धे ! तल्पं विहाय पश्य व्योमभाले ।।

नयनयुगलमुन्मीलय.....

उल्वणविरहाग्निदग्धमुग्धा सु वराकी,
त्वभिसरति प्रियं प्रति सम्प्रति हि चक्रवाकी;
निशिजागरणेन पाण्डुवदनो नु मृगाङ्कः,
विशतितरां सुतरां शयनाय निरातङ्कः,

नयनयुगलमुन्मीलय.....

रङ्गिणि ! सरिदियं नृत्यतीव वहति तरला,
सिञ्चन्ती पुलिनपटं बालिकेव सरला,
दूर्वादलहरितमुपवनं मरालमाला,
न्यञ्चति चोत्पतति वियति गच्छति सुविशाला,
'कुहु-कुहु' कूजति विदग्धकोकिलो रसाले !

नयनयुगलमुन्मीलय.....

सखि ! विमुग्धवदने !! परिवर्तय परिधानं
ह्यवतरति दिनश्रीः, कुरु वन्दनाविधानं
पञ्जरगतशुकः किमपि पठति बावदूकोऽ-
प्यन्वेषयतीव हरिणपोतकोऽपि मूकः
अभिनन्दय सर्वान् अयि ! प्रणयिनि ! रसशाले ।।

नयनयुगलमुन्मीलय.....

३. गायत्रीगानम्

प्रत्यहमुदेति लोकान् पश्यन् यः खलु जगत्पिता।
स्वेनैव वरेण्यतेजसा तद्रक्षतु नः सविता॥
यन्मण्डलोद्भासिधामैतद् धारयते संसारं,
यस्य गभस्तस्य ऊर्जितवक्त्राः हरन्ति तमोविकारम्।
यस्यारुणः श्रयति सारथ्ये गन्धर्वाः किल गाने,
वालखिल्यऋषयस्तु नियुक्ताः यस्य स्तवनविधाने,
सप्ताश्वैः ध्रियमाणः सततं यस्य रथो जविता॥
स्वेनैव वरेण्य……
अग्नीषोमात्मक एतस्मिन् प्रचलति संसृतियज्ञे,
यः केन्द्रस्थो रयिप्राणानामाहुतीस्तु संजज्ञे,
यो जगतां तस्थुषां ज्योतिषां पतिर्गतिः सर्वेषां
दृढीकरोति वीर्यबलमोजो यः स्वरोचिषा तेषाम्;
यस्त्रिगुणात्मधिया एकोऽनेकस्य हि प्रसविता॥
स्वेनैव वरेण्य……
त्रिवृदोंकारमूलमन्त्राढ्यं यमीडिरे वै वेदाः
भूर्भुवः स्व इति व्याहृतयोऽपि संजगुः यमभेदाः;
योऽनुप्रविष्ट एकः सन् बाभात्युरुधाऽपि परस्मिन्,
त्रेधा यो विनिदधे पदं त्रिभुवनं व्यनैषीत् स्वस्मिन्,
आदित्यानां परमस्तादृग् भूतो नो भविता।
स्वेनैव वरेण्य……
यं न वेद सम्यक् प्रहिताऽपि चतुर्धा सैषा वाणी,
तमसोऽस्मान् ज्योतिर्गमयेन्ननु यस्य विभा कल्याणी,
वयममृतत्वमिहाशासानः स्तुमः सुपर्णं हंसं
द्विपदाश्चतुष्पदास्तिर्यञ्चः प्राणिनो लभन्तां शम्,
'धियो नः प्रचोदयात्' स देवः फलत्वियं कविता।
स्वेनैव वरेण्य……

●

४. जलदोपालम्भगीतम्

गर्जसि किं मुधा जलद ! वर्ष सुखदनीरम् ।।
कुरुषे किं प्रणयिचित्तचातकमवधीरम् ।।
गर्जसि किम्.....

उन्मनायते नु पश्य ललितशिखिसमूहः,
मञ्जुलास्यमध्ये किल जातप्रत्यूहः,
त्यक्त्वेदं कटुरावं निनद रे ! गभीरम् ।।
कुरुषे किम्.....

विरहे तव विरसेयं ह्यवनिकान्तिहीना,
संपश्यति सोच्छ्वासा त्वामिह रे ! दीना;
यथा तथा वहति मिहिरतापितं शरीरम् ।।
कुरुषे किम्.....

कृषकजनसमूहोऽप्ययमनुरागमुपेत-
स्तेऽभिनन्दनं तनोति भावनासमेतः,
सेवयति मृदुदकदयितगन्धवत्समीरम् ।।
कुरुषे किम्.....

सम्प्रति नहि दृश्यते सा दयिता रसराता,
चपला न ह्यंकगता कुत्र प्रतियाता ?
दग्धहृदय ! पश्यसि नहि शुष्कतटिनितीरम् ।।
कुरुषे किम्.....

५. प्रावृड्गीतम्

पश्य केलिनिकुञ्जमञ्जुलवञ्जुलवञ्जुलैः परिवारितम् ।
सुतनु ! वृन्दावनवनान्तरमलिकुलैः सञ्चारितम् ॥
तरणिजातटनवतमालं,
कलितकोरकनीपजालं,
नवघनागमनिर्भरं शिखिवृन्दकेकाकारितम् ॥००॥
वाति मन्थरमदिरपवनः
हरति कस्य जनस्य न मनः
सखि ! अनेन मदीयहृदि सौहित्यमतिविस्तारितम् ॥००॥
आलि ! रटति सु चातकोऽयं
त्वस्य पाप्मा हन्त ! कोऽयम् ?
प्रियविरहमनुभवति हा ! विधिना कृतं ह्यविचारितम् ॥००॥
अस्मदीयप्रियमुकुन्दः
ललितनववदनारविन्दः
सघननीलबलाहकैस्तद्वपुरहो संस्मारितम् ॥पश्य०॥

६. एहि नन्दलाल !

('बुन्देली'-लोकध्वनिमाश्रित्य गीतिः)

वृदावने यमुनाकूलकुञ्जे भ्रमर-
मुखरपुञ्जे एहि नन्दलाल ।
कुसुमितसुकदम्बे पूरितघनबिम्बे
दिनमणिरिव दर्शनं प्रदेहि नन्दलाल ।
कूजितखगवृन्दे वितरितमकरन्दे
परभृत्स्वच्छन्दे पुलिने सुविशाले
शोभितशशिबिम्बस्फुरितयामुनाम्भ-
स्त्वमेहि नवलनर्तनानुकारिचन्द्रभाल ।।
वादय वनमालि क्षणमिह मधुशालि
स्वीयवेणुयन्त्रं धर्षितेन्द्रजाल ।।
कुरु कुरु नव लास्यं मधुसुस्मितहास्यं
देहि चरणदास्यं ललित धेनुपाल ।।
वृन्दावने यमुनाकूलकूलकुञ्जे
भ्रमरमुखरपुञ्जे एहि नन्दलाल ।।

७. परुषं प्रीतिविधानम्

(गीतम्)

प्रेयसि ! परुषं प्रीतिविधानम् !
पश्य, चकोरीं या निशि चन्द्रे कुरुते दृक्संधानम् ॥००॥

क्व गगनपथचारी राकेशः
तपति कियद्दूरे नु दिनेशः
पश्य कुमुदिनीं पश्य कमलिनीं, सूचयतो महिमानम् ॥००॥

रटति चातकी मेघं दृष्ट्वा,
तां त्रासयति स उपलं सृष्ट्वा;
सा प्रीतिं परिचिनोति बालाऽविगणय्य स्वात्मानम् ॥००॥

दीपो ज्वलति तु पतति पतंगः,
स्वरेणैव हन्यते कुरंगः,
ज्योतिः पश्यति केवलमेकस्त्वपरः केवलगानम् ॥००॥

सखि ! वितथो नितरामनुताप-
स्त्यजति न हृदयमयं खलु शापः,
मुधा विलपनं मुधा प्रलपनं मौनमत्र हि निदानम् ॥००॥

प्रेयसि ! परुषं प्रीतिविधानम् ॥

८. नववर्ष-गीतम्

आगतमिह नववर्षं
जनयतु हृदि हृदि हर्षं,
विरसं, सरसं कुर्यादिमं कार्यभारम् ॥
जने जने मनसि मनसि,
शुष्के तु स्नेहसरसि,
श्रान्ते क्लान्ते लोके वर्षतु सुखसारम् ॥
आगतमिह नवर्षम् ॥
अपसर्पतु क्रूरा दुर्दैवकृता क्रीडा,
गच्छतु दूरे ह्येषा पापमयी पीडा,
द्वेषं दुरितौघमिमं नयतु शान्तिद्वारम् ॥
आगतमिह नववर्षम् ॥
दैनन्दिनजीवनमिह भवति कष्टहीनं,
दैन्यं नहि यातु कोऽपि पश्यतु नहि दीनम्,
राजनये नैतिकता लभतामधिकारम् ॥
आगतमिह नववर्षम् ॥
मुदं समुपयान्तु सदा कर्षकगणमान्याः,
वर्धन्तां श्रमिकजनाः सज्जना वदान्याः
मोदन्तां मिथः प्रकुर्वन्तो ह्युपकारम् ॥
आगतमिह नववर्षम् ॥
विद्वज्जनपूजनं भवेदिह संसारे,
भारतं सदाऽग्रणीर्भवेद् गुणप्रचारे;
अस्य कीर्त्तिवल्ली प्राप्नुयात् सम्प्रसारम् ॥
आगतमिह नववर्षम् ॥

●

९. उद्बोधनम्

हृदि परिभावय रे ! त्वया कृतं किमनवद्यम् ?
पठनान्नहि फलति मूढ ! केवलमिह पद्यम् ।।
दुरवगमः पन्थाः पान्थं नु त्वामधीरं
पदे-पदे प्रलोभयति मृगतृष्णानीरम्,
प्रापितं तु वद ! कदाप्यनेन किमपि हृद्यम् ।।
पठनान्नहि फलति मूढ ! केवलमिह पद्यम् ।।
जीवनमिदमकस्माद् गमिष्यति हि दुरन्तं,
न हि गच्छति मनः किन्तु कामानामन्तम्,
मुञ्चति न हि कालो मूर्खं वा कृतविद्यम् ।।
पठनान्नहि फलति मूढ ! केवलमिह पद्यम् ।।
दाक्ष्यं तव सर्वमरे ! चाकचिक्यमूलं,
जातुचिन्निराकुरुते किं मानसशूलम् ?
तमपि पातयिष्यति बहु मन्यसे तु यद्-यम् ।
पठनान्नहि फलति मूढ ! केवलमिह पद्यम् ।।
त्यज सर्वानर्थमूलमर्थकृतं मोहं,
चिन्तय, 'कुत आयातः ?' 'कस्य कृते' 'कोऽहम्'
'सविनय'गोविन्द कृष्ण माधवेति गद्यम् ।
पठनान्नहि फलति मूढ ! केवलमिह पद्यम् ।।

१०. "कथं जातम्"

(गजलगीतिः)

व्योम्नि सहसैव घोरगर्जनं कथं जातम् ?
अद्य पश्याम्यनवसरे कथं नु पविपातम् ।।
यत्र नवशारदीयचन्द्रिकाचमत्कार -
स्तत्र लयकारि मेघमण्डलं किमायातम् ।।
रे ! विधातस्त्वया विचारितं किमद्य यर्हि
सर्जनोपक्रमे विसर्जनं समाम्नातम् ।।
चन्द्रलोकावलोकनाय भूः समुन्नद्धा-
परिमलं किमपि विसृज्यात्मनस्त्वनाघ्रातम् ।।
किन्नु मनुजस्य भाग्यपट्टिकासु लिखितं भोः !
हन्त ! नाद्यापि यत्तु कैश्चिदपि व्याख्यातम् ।।

११. वद विधुवदने !

(गजलगीतिः)

वद, विधुवदने त्वदीयमानसे कथं भीतिः ?
अपरिचितं कलयसि मयि प्रणयिनि, का संशीतिः ?
किं त्वया पीतमिदं मोहमयं मैरेयं
कापि वा युगस्यैव वञ्चनामयी रीतिः ॥
नाद्य रुद्धाऽसि देहलीषु सतम्प्रितं हि देवि !
'देहली' संस्थिता, तथापि ते न संप्रीतिः ॥
नाद्य त्वं सेविकाऽसि, स्वामिनी स्वयं जाता,
कथं सहसे बलात् स्वधर्षणं तथाऽनीतीः ।
नारि ! मृगतृष्णिकासु वारि प्राप्यते न मनाग्
नापि सिकतासु क्वचन लभ्यते सुधास्फीतिः ॥

१२. पश्य मुकुरे क्षणं नु वदनं स्वम् !

(गजलगीतिः)

पश्य, मुकुरे क्षणं नु वदनं स्वं, कीदृशो रे ! त्वमद्य संजातः ।
तिष्ठ निमिषं तथापि भूपृष्ठे, यद्यपि त्वं वियच्चरो भ्रातः ।।

यत्तु नीहारिकासु नगरं ते,
प्रोज्ज्वलं कान्तिमयं प्रतिभाति,
हन्त! प्रहराद्धि समुदिते भानौ, यत्तु निधनं गमिष्यति प्रातः ।।
पश्य मुकुरे..... ।।

यत्कृतं भोस्त्वया न तद्वच्मि,
किन्तु कथयामि विरम संहाराद्,
यर्हि श्वासोऽपि साम्प्रतं रुद्धस्त्वद्भिया वाति नो सखे! वातः ।
पश्य मुकुरे..... ।।

कञ्चुकं यदपि परिधृतं शुक्लं
श्यामिकासंकुले स्वरूपेऽस्मिन्,
तन्न सुचिरं भविष्यति भ्रान्त्या कस्य पदवीं मुधा त्वमनुयातः ।
पश्य मुकुरे.....।।

मित्र ! हृदयं क्षणं समवलम्ब्य,
ध्यातुमर्हस्यहह ! 'विनय' एतन्,
मञ्जुमेघावलीष्वपि क्रान्त्या भवति किमयं न वज्रसम्पातः ।
पश्य मुकुरे.....।।

●

१३. क्षणिका

जीवनमस्ति पिपासा !
घर्मतप्तसिकता सुधावनं,
मोहमरुस्थलवनं प्रतिवनं,
परतो हन्त ! हताशा,
सत्यं जीवनमस्ति पिपासा ! !
त्वं याने अहमिह पथचारी,
पदरहितोऽहं, त्वं पदधारी,
अन्तरमस्ति तावदेवैतद्
यावन्नास्ति यियासा,
जीवनमस्ति पिपासा ! !
खपुष्पायिताऽऽकांक्षा सेयं
'इतोऽप्यधिकमिह ह्यनुसन्धेयं'
सततं सैव दुराशा,
जीवनमस्ति पिपासा ! !

१४. अहो ! अद्य यूनां गतिः का नु जाता !

(गीतिः)

अहो ! अद्य यूनां गतिः का नु जाता,
यदेतान् विनिर्माय शेते विधाता ।।
न कुत्रापि येषां कृते ह्यादरं स्यात्
कुतस्तेषु 'सत्यं शिवं सुन्दरं' स्यात्
विमार्गाश्रितानां न वै कोऽपि त्राता ।।
अहो ! अद्य यूनां गतिः का नु जाता !!
गता क्वापि प्रीतिः श्रिता कूटनीति -
स्तु सर्वत्र संदृश्यते ईति - भीतिः ।
धनं पूज्यते नैव तातो न माता ।।
अहो ! अद्य यूनां गतिः का नु जाता ।।
प्रपञ्चे प्रवीणा तु यस्यास्ति बुद्धिः,
श्रिता हस्तयोर्निश्चितं तस्य सिद्धिः,
प्रियं रूप्यकं, नाद्य बन्धुर्न भ्राता ।।
अहो! अद्य यूनां गतिः का नु जाता ।।
उलूकाः स्थिताः नन्दने कानने हा !
पिकः पीड्यते कण्टकानां वने हा !!
न कोऽप्यस्ति सत्यानृतस्य प्रमाता !
अहो ! अद्य यूनां गतिः का नु जाता ।।
यदेतान् विनिर्माय शेते विधाता ।।

●

श्लोकमञ्जरी

(रचयिता : डा० विन्ध्येश्वरीप्रसाद मिश्रः 'विनयः')

१. मङ्गलम्

वन्दे वृन्दारकाराध्यां वन्दारुजनवन्दिताम् ।
नन्दितां नादनिष्यन्दैर्वाग्देवीं मङ्गलप्रदाम् ॥
चञ्चच्चामीकराभां चलविचलरणत्किङ्किणिक्वाणरम्या-
मानन्दैकाम्बुराशिं मधुकरनिकरैर्गुञ्जितामङ्घ्रिपद्माम् ।
वीणां संलालयन्तीं मृदुरणनविधौ मूर्च्छनां भावयन्तीं
वन्दे कल्याणवल्लीं विविधबुधनतां शारदां शास्त्रविद्याम् ॥
नव्यन्यायनिरूपणापथिपरं पारङ्गतान् पण्डितान्
श्रोतॄन् वा कठिनाक्षरक्षरणतासंवारणायोद्यतान् ।
नानारत्ननिवासगौरवगुणे रम्यस्थले 'सागरे'
लक्ष्मीलक्षणलक्षितस्तदधुना नारायणः पातु नः ॥
पटप्रमोषी घटभंजने पटुः धूमालकश्चाङ्गुलिपर्वपर्वतः ।
अह्नाय वह्निं पिबति स्म यो वने स नीलमेघः स्यतु मेऽघराशिम्

श्रीमारुतिनुतिः

प्रपन्नपरिपालकं दनुजजालसंज्वालकं
मुनीद्रवनचन्दनं विनतमञ्जनानन्दनम् ।
कपीन्द्रकुलवल्लभं सततरामचन्द्रप्रभं
नमामि कपिकुञ्जरं कपटवानरं शङ्करम् ॥१॥

ललितमथ सुगायन् क्वापि नृत्यनप्रसन्नः
कलितमुखरवाण्या कीर्त्तयन् रामकीर्त्तिम् ।
चलितवलययुग्मं नादयन् ताललग्नो
मधुरसरसिकोऽयं मारुतिः पातु भक्तान् ॥२॥
मर्कटौघभटं शश्वद्विकटोद्भटसङ्घटम् ।
पिङ्गलाक्षिजटं ध्यायेद्रामायणकथानटम् ॥३॥

नानाकर्कशतर्कजालविपुलध्वान्ताध्वनि प्रस्थितान्
नानावादविवादडिण्डिमनदद्घोषान् स्वपक्षस्थितान् ।
नानान्यायनिरूपणैकधिषणाधौरेयकान् धीमता-
माह्लादेन युनक्ति यत्तु सुतरां तत्तत्त्वमेकं नुमः ॥

२. नुति-षोडशी

जय नलिनीदलनयने धवलितचंद्रांशुमञ्जुलायतने ।
सुचिरविरोधाभासे भाषाभावात्मिके रुचिरे ॥१॥
जय दुग्धाम्बुधिवीचीक्षालितडिण्डीरपिण्डितस्वाङ्गे ।
त्रैलोक्यशब्दसारे सारान्विते त्रिजगद्धात्रि ॥२॥
जय 'विन्दु-नाद'-महिते नितरां साहित्यशेमुषीगम्ये ।
रम्ये रम्यविलासे मञ्जुलहासाञ्चिते विमले ॥३॥
जय सङ्गीतसुधानदनन्दितनिष्यन्दरागरंगयुते ।
वीणाक्वणननिलीने कूजत्कलकण्ठिके मुग्धे ॥४॥
मुग्धे दुग्धसुधासिन्धुतरङ्गोज्ज्वलमञ्जुले ।
मङ्गले मन्दबुद्धिं मां स्मर त्वं कविभारति ॥५॥

मिलिन्दमाला मकरन्दनिर्भरा
यथाम्बुजे क्रीडति बद्धडम्बरा ।
तथा तवास्योपरि हास्यसङ्गता
विभे विभातीयमथालकावली ॥६॥

स्फुरच्छरच्चन्द्रमरीचिमेदुरे
त्वदीयचूडामणिचारुमस्तके ।
सरस्वति ! व्योमविकासतारक-
श्रिया बभौ चन्दनविन्दुरञ्जसा ॥७॥

सिते ! तवापाङ्गतरङ्गनिर्झरीं
भ्रुवावपि त्रातुमितो न पारगे ।
अतस्तु पक्ष्मान्ततटे नु वञ्चिते
त्रिवक्रनक्राकृतिके बभूवतुः ॥८॥

तवाधरं बिम्बविडम्बि पाटलं
सुबिम्बितं वीक्ष्य हि दन्तमौक्तिके ।
इयं प्रलुब्धा ननु नासिकाशुकी
ग्रहीतुकामा प्रतिभाति भारति ॥९॥

कपोलपाली तव केशराङ्किता
कलङ्कमुक्तेव शशाङ्कपट्टिका ।
क्व तालपत्रं बत गौरवं श्रयेत्
तव श्रुतिं चेन्निपुणं न भासयेत् ॥१०॥

तव वदननिकुञ्जे पुञ्जिता पूर्णशोभा
तव वदनविरामे रञ्जिता वेदविद्या ।
तव वदनविलासे भासिता च स्वयं श्री-
स्तव वदनविकासे काशते ब्रह्मतत्त्वम् ॥११॥

अमलकमलकोमलाङ्घ्रिशीले
सकलकलानदराजहंसि पुण्ये ।
कविकुलनवकुञ्जकूजिते त्वं
कुरु करुणामिह कोकिलेऽद्य वाणि ॥१२॥

मातः ! कृपामयि विवेकविधानदक्षे
प्रेमालये परममंगलमंजुलास्ये ।
वीणानिनादनिरते स्वरगुञ्जिते मां
दीनं पुनीहि नितरां विमले वरेण्ये ॥१३॥

भास्वच्छशाङ्ककिरणावलिविग्रहे हे
हेलाजिताखिलसुधामधुदुग्धसारे ।
वैदुष्यदानचतुरे चरणाश्रितं मां
दीनं पुनीहि नितरां विमले वरेण्ये ॥१४॥

करुणावरुणालयेऽनवद्ये मुदमाङ्गल्यतरङ्गशोभिगङ्गे ।
तवपादसरोजसम्पुटेऽयं रमतान्मे ननु चित्तचंचरीकः ॥१५॥

तव चिन्तनवन्दने ममैका मतिरम्भोजविलासिनी सुहंसी ।
नितरां तव हंसवामभागे चपलेयं स्थिरतां श्रयेत्कथंचित् ।१६॥

३. पिक-पञ्चदशी

काचित्कृष्णप्रणयभरिता बल्लवी लग्नचित्ता
याते तस्मिन् व्रजपरिधितस्त्वौग्रसेनीनगर्याम् ।
रम्योद्याने विरहविधुरा भग्नभावा विषण्णा
दृष्ट्वाऽऽयान्तं मधुऋतुपतिं चिन्तयामास भूयः ॥१॥

हन्ताशा मे त्वियमपि गता पूर्ववत् पङ्कजालेऽ-
प्यालेखं वा विधिकृतमहो ! मार्जितुं कः समर्थः ?
मद्भाग्ये हा ! प्रतिदिनमिदं रोदनं चाश्रुपातं
नायातश्चेन्नवघननिभः श्यामलो नन्दसूनुः ॥२॥

कालिन्द्यां यत्पुलिनपटले सञ्चरच्चञ्चरीकै-
र्गुञ्जारावस्फुटितकलिकाः कम्पयन् कुञ्जवल्लीः ।
पश्यालि त्वं तरलितगतिर्वात्यसौ गन्धवाह
इत्थं भावाकुलितवचनैर्बोधयन्ती वयस्याम् ॥३॥

अद्राक्षीत् सा सुरभितशिखां कम्रनम्राम्रशाखां
शाखासंस्थं नवपरभृतं कूजितोन्मादमत्तम् ।
मत्तं चेमं भुवनमखिलं व्यापृतं मोहमन्त्रं
मन्त्राधानप्रवरमथवा मन्त्रिणं मन्मथस्य ॥४॥

स्मृत्वा पूर्वप्रणयिविहितां मञ्जुलां रासकेलिं
श्रुत्वा पूर्वश्रुतकलपदं कोकिलस्यापि बाला ।
दृष्ट्वाग्रे तं सुरभिसमयं कान्तसंरागसिक्तं
तस्मिन्नेव क्षणपरिचयात् किञ्चिदुत्कण्ठिताऽभूत् ॥५॥

"भ्रातः कुञ्जप्रिय ! खगकुलैर्वन्दितो नन्दितस्त्वं
कन्दर्पस्य प्रसरणसखा सारथिश्चाग्रयायी ।
वासन्तिक्यां पवनसरणौ रागसम्भारसेतु-
र्हेतुः सत्यं निधुवनसुखे कामिनामेकबन्धुः ॥६॥
श्रेष्ठस्त्वं भोः पिक ! कलविधौ पञ्चमे लग्नकण्ठः
पञ्चेषोः वा परमदयितः पञ्चबाणप्रतिष्ठः ।
पञ्चप्राणान्हरसि सुतरां किन्तु विश्लेषितानां
पञ्चाग्नौ वा क्षिपसि सततं तत्कथं ब्रूहि हन्त ॥७॥

त्यक्त्वाऽस्मान्नः परमदयितो नन्दगोपालबालः
प्राणाराध्यस्सजलजलदश्यामलः कोमलाङ्गः ।
कुब्जां क्रूरां परमकुटिलां सेवते त्वौग्रसेन्यां
श्रुत्वेत्थं हा विगलितवचो मूकतां किं न धत्से ॥८॥

सेवां कृत्वा विविधविधिना पालिता स्नेहवल्ली
गोपालस्य प्रणयसरणौ सिञ्चिता लालिता या ।
तां प्रोत्तप्तां विरहदहनज्वालितां पाण्डुपर्णां
पश्यामस्त्वं विदलसि पुनश्चित्तमप्यस्मदीयम् ॥९॥

सौम्य ! त्वेतच्छृणु मधुवने कूजने न प्रतिष्ठा
संदग्धानां हृदयदहने कोऽत्र लाभो विहंग !
गत्वा त्वं चेन्मधुपुरपतेश्चित्तमाविष्करोसि
मंस्येऽहं त्वामृतुपतिसखा सत्यमुन्मादकर्त्ता ॥१०॥

एषा धूलीलवविलुलिता पांसुलाऽऽभीरपल्ली
नेयं चामीकरमणिमयी राजधानी वरेण्या ।
क्रोडेऽप्यस्याः विलसति न वा वाटिका कापि रम्या
दग्धं वृन्दावनमिदमहो ! क्षुब्धगोपाङ्गनाली ॥११॥

नास्यां कार्तस्वरभरनता नागरीणां विलासः
किन्तूत्कार्तस्वरभरनता गोपवाटी विषण्णा ।
नेयं लीलाजनितललितारम्भवार्ताऽपि किन्तु
त्वल्लीलासंजनित'ललिता'रम्भनिःश्वासराशिः ॥१२॥

साबाधाऽस्मिन्भ्रमति रुचिरा सन्ततं हन्त ! राधा
संत्रस्ता सा ललितललिता भग्नशाखा 'विशाखा' ।
मुग्धा 'चन्द्रावलि'रियमहो 'रंगदेवी' विषण्णा
रंगानङ्गे क्षिपति विरहव्याधिविक्षिप्तचित्ता ॥१३॥

संचिन्त्येतत्सकलमधुना याहि तां शौरसेनीं
यस्यां वृष्णिप्रवरनृपतिश्शोभते वासुदेवः ।
तस्योद्याने कुरु कलरुतं कूजनं वाऽतिरम्यं
यस्मिन्नित्यं वसति सशरः सानुजः पुष्पधन्वा ॥१४॥

इत्थं गोपीविरहवचनोद्भूतवक्रोक्तिभङ्गी
श्रीकृष्णस्य स्मरणविधया मञ्जुकल्याणराशिः ।
भावाक्षिप्ता सुकविहृदये कल्पनासङ्गताङ्गी
मन्दाक्रान्ता ललितकवितावृत्तबन्धैर्विभाति ॥१५॥

४. रङ्गपञ्चकम्

वृन्दारण्ये तपनतनयातीरवीथीषु रम्ये
राजत्क्रीडामहसि सुतरां माधवीये विलासे ।
काचित्कुञ्जे वदति मुखरा "शाटिका मे नवीना
मा मा मा मा क्षिप विट ! मुधा श्यामलं स्वीयरङ्गम्" ॥१॥

चल सखि नववीथ्यां नीपपुञ्जे निकुञ्जे
विलसति वनमाली यत्र गोपालवृन्दैः ।
प्रहरति किल राधां यन्त्रधाराप्रवाहैः
प्रवहति पथि कुल्यासम्भृतः कोऽपि रङ्गः ॥२॥

अनुसरति मृदङ्गं किङ्किणीनादरम्यः
प्रतिहतवरढक्कां काङ्किणीलास्यलीला ।
नवपिककलकण्ठं वंशिकाऽप्येकताना
विलसति सखि ! वीथ्यां होलिकानृत्यरङ्गः ॥३७॥

हरिरिह नटवेशे गुञ्जपुञ्जावतंसो
विधृतमधुरवेणुश्शोभते वक्रभङ्ग्या ।
सपदि सखि ! तदानीं रङ्गनिक्षेपयन्त्या
कृतमलसविलासैः राधया रागरङ्गः ॥४॥

रङ्गोत्सङ्गात्सुभृङ्गाङ्गैः प्रसरद्भङ्गिगमामयः ।
वसन्तोल्लासबालोऽयं जयतात् पञ्चकाश्रितः ॥५॥

५. वसन्तोल्लासः

विलसति मधुमाधवो दिनश्रीः
मधुकरगुञ्जितरञ्जितावनाली ।
विकसितनवमल्लिकावितानं
चलति च मञ्जुलमन्दगन्धवाहः ॥१॥

हरितललितशाद्वलेषु मुग्धा
प्रकिरति पुष्पलता पिशङ्गशोभाम् ।
श्रयति शिरसि कामपीह कान्तिं
मदनसखः सुरसालमञ्जरीकः ॥२॥

कलयति कलकेलिलास्यलीला-
स्तरलतरङ्गवती तरङ्गभङ्गैः ।
रहसि सुरतसीधुसिञ्चितास्ताः
रतिरमणीयनितम्बिनीजनानाम् ॥३॥

मदयति मदविह्वलो वनान्ते
'कुहु-कुहु' कूजित कोकिलोऽतिरम्यः ।
तिरयति तरुणीषु वर्तमानां
गुरुजनगौरवभावितां तु लज्जाम् ॥४॥

कुसुमकलितचापपाणिरेष
प्रसृतविघूर्णितदामपुष्पिताग्रः ।
प्रहरति किल शोभिते वसन्ते
विरहिजनान्तिरां हि पञ्चबाणः ॥५॥

सम्फुल्लिता सुरुचिरा लतिका वनान्ते
संघूर्णिता मधुमयी ननु नर्मदाऽपि ।
संकूजिताऽथ सहकारगता पिकीयं
कान्ते विभासि विमनेव कथं वसन्ते ? ॥६॥

वैदेशिकाः प्रेष्ठजनाः निवृत्ताः
वसन्ति गेहेषु वसन्तकाले ।
त्वं मे वसन् मानसमन्दिरे हा !
कथं बहिर्गच्छसि मुग्ध कान्त !!

सुजनजनमनांस्युन्मादिनी कापि लक्ष्मी-
र्विलसति सविलासा लास्यलीलासु लग्ना ।
मदयति मदपूर्णो घूर्णिताक्षः प्रलीनो
विटपिविटपवृन्ते कोकिलोऽयं वसन्ते ॥८॥

वसन्ते वासन्ती विलसति वनान्ते सुरुचिरा
हसन्ती नृत्यन्ती मधुमुखरकन्दर्पकलना ।
दिगन्तेष्वालिप्ता सखि ! ललितलाक्षारसकला
दिनान्ते संरक्ता हरति नयने कापि सुषमा ॥९॥

६. शरद्वर्णनम्

('सवैया' छन्दसि)

यमुनावटमञ्जुनिकुञ्जघने घनसाररसावलिते विपिने,
विपिने नवनीरजगन्धयुते युतपङ्कजकोषमिलिन्दजने ।
जनमानसमानिनिमानमुदे मुदिताधरपानपुटे कमने ।
कमने ननु रासरसे सुविभाति शरत् सखि ! नैशसरत्पवने ।।

('घनाक्षरी-कवित्त' छंदसि)

कलितकदम्बनिकुरम्बकेलिकुञ्जघने
पुलिने कलिन्दजायाः लघु लघु सा विभाति ।
ललितवनाली परिवेष्टिते नु वृन्दावने
नव्यामेव शोभामावहन्ती तरसा विभाति ।।
बलितनिरभ्रशुभ्रतारकिततारापथ-
सञ्चारामन्दचन्द्रसारसरसा विभाति ।
सरति समीरे सखि ! यामुने गभीरे नीरे
धीरे बलवीरे शरदेषा सहसा विभाति ।।

('दोहा' छन्दसि)

सुतनु ! न सम्प्रति दृश्यते, सरित्पङ्किला कापि ।
चापल्यान्ननु निर्गता गगनाद् घनच्छटाऽपि ।।

७. शकुन्तविलसितम्

१. शुकसारिका-संवादः

सारिकां प्रति शुकोक्तिः

कान्ते ! किंशुककुड्मलेष्वतितरां किं मृग्यसे सारिके !!
सारासारविवेचने तव मतिर्नैषाऽप्यमुग्धाऽधुना ।
हन्त ! त्वामिदमर्थये पुनरपि द्राक्षारसान्वेषणात् ।
कामं त्वं विरमाधुना शुककुलं मा गर्हय प्रेयसि ॥१॥

सारिकोक्तिः शुकं प्रति

वाचालोऽसि परोक्तिजल्पनपटो ! रे कीर ! का ते कथा ?
स्वात्मानं बहु कत्थसे स्वयमहो ! नान्यं तृणं मन्यसे ।
किं जानासि न निम्बकोटरगतं त्वां सर्वदा सा शुकी
डिम्भादेव तदीयगुच्छकलने माताऽकरोत् पण्डितम् ॥२॥

शुकोक्तिः सारिकां प्रति

श्यामे ! कटूक्तिकुशले वामे तव नाम सारिकेति वृथा ।
भ्रमसि पलाश-पलाशे निःसारे सारकामनया ॥३॥

सारिकोक्तिः शुकं प्रति

शुक ! ते मुखेऽस्ति रागस्त्वन्यत्र नैव दृश्यते क्वापि ।
निम्बफलेष्वनुरागं कुरु, रसिको भव शतञ्जीव ॥४॥

२. अन्योक्तयः

पञ्जरस्थं शुकमवलयोक्य कस्यचिज्जनस्योक्तिः

रुद्धोऽसि लौहसदने सति खेचरत्वे
निष्पक्षतामयसि पक्षयुगं दधानः ।
तुण्डं विखण्डयसि हन्त ! रसानुलिप्तं
वाण्यैकया मधुरया मुषितोऽसि कीर ॥५॥
काकः समुत्पतति दत्तबलिं च भुङ्क्ते
स्वैरं विरौति नहि तस्य कृतेऽस्ति चिन्ता ।
हा हन्त ! लोकसरणीमनवीक्ष्य भद्र !
वाण्यैकया मधुरया मुषितोऽसि कीर ॥६॥

पञ्जरस्थं पठन्तं शुकमवलोक्य कस्याप्युक्तिः

रे क्षीरीकान्त ! विद्वन् पठ पठ पुरतः शिक्षितं पालकस्य
तावच्छ्लोकं च गीतं ह्यनुसरणविधौ प्राञ्जलं चाटुवृत्त्या ।
तावज्जातीयभाषां विगणयतु भवान् मानुषीवाक्प्रमत्तः
यावत्तास्यापयाते न हि नयनपथं ते विडालो नु यायात् ॥७॥

पञ्जरपालितमवलिप्तं शुकं प्रति मुक्तविहंगमानामुक्तिः

हिरण्मयशलाकया घटितपञ्जरे यद्यपि
प्रकाममुपभुञ्जसे सपदि कीर ! नानारसान् ।
विकीर्णकणभोजकान् यदपि निन्द्यसेऽस्मादृशान्
न किन्तु परिपश्यसि त्वमिह पक्षहानिं निजाम् ॥८॥

समस्यापूर्तयः

१. भद्रमूर्तिः

प्रोद्वेल्लद्गन्धवारिप्रसरदभिमुखं गण्डयुग्मालिवृन्दं
न्यक्कर्तुं शुण्डदण्डाप्रचलनरभसोद्विग्नवक्त्रः समन्तात् ।
श्रान्तिं व्याहन्तुकामः स्फुरदरुणरुचौ शूर्पकर्णौ स्वकीयौ
धुन्वानो वक्रतुण्डः प्रभवतु भवतां भूतये भद्रमूर्तिः ॥

२. गजाननं वन्दे !

अवजानताऽन्तरायान् भवजालं खण्ड्यते येन ।
तमजादिवृन्दवन्द्यं नगजानन्दनगजाननं वन्दे ॥

३. स्मरामि !

क्वचित्तु वृन्दावनकेलिकुञ्जे
क्वचिद्यशोदागृहप्राङ्गणे च ।
क्वचिच्च वीथ्यां सुविहारशीलौ
कृष्णाङ्घ्रिपद्मौ मनसा स्मरामि ॥

४. वागीश्वरी पातु वः

सरिगमपधनि—निलीनां
लीनाङ्घ्रिपद्मनूपुरभृङ्गरुताम् ।
कमलिनीं लसितहंसां
वीणावादनिकां स्मरामः ॥१॥

या कल्हारदलोपमां तनुलतां चन्द्राननेनाञ्चति
हंसे चापि निधाय पादयुगलं या कच्छपीसङ्गता ।
या काञ्चीमणिशिञ्जिताऽप्यनुपदं मौनाब्धिसंस्था परा
सा सर्वाश्रितभावबोधलहरी वागीश्वरी पातु वः ॥

५. सज्ज्ञानचर्चासुधा

माध्वी मोहमलापहा मुदमयी माङ्गल्यमुद्भाविनी
सच्चिद्व्योमविलासवल्गिततरङ्गाकाशगङ्गा परा ।
विद्वद्वृन्दकदम्बकोरककलाकल्याणकादम्बिनी
कैवल्याम्बुतरङ्गिणी विजयते सज्ज्ञानचर्चासुधा ॥

६. वसतु मे वदने सुरभारती

मधुमती रसरीतिसमन्विता
विदितवेदविभावरवर्णिनी ।
स्मृतिपुराणनिकुञ्जविलासिनी
वसतु मे वदने सुरभारती ॥१॥

भरितभावसुधा ध्वनिसंयुता
मधुरताऽऽदिगुणत्रयभूषिता ।
सहृदयादृतवृत्तिविधान्विता
वसतु मे वदने सुरभारती ॥२॥

वाल्मीकिर्व्यासभासौ कविकुलवलये मण्डितः कालिदासः
दण्डी बाणः सुबन्धुः प्रथितपृथुयशा भारविश्चापि माघः ।
श्रीहर्षाद्याः कवीन्द्राः सकलकृतिकृते यां समाराधयन्ति
वन्दे तां ब्रह्मविद्यां श्रुतिसततनुतां संस्कृतां देववाणीम् ॥३॥

७. भिन्नरुचिर्हि लोकः

गूढं समीक्ष्य तिमिरेण जगत्समग्रं
कालाञ्जनाभकलिलं वियदन्तरालम् ।
सप्ताश्ववाहनविटङ्कसमाश्रितश्री-
र्भास्वानुदेति ननु भिन्नरुचिर्हि लोकः ॥

८. न जानीमहे

एके सन्ति निरक्षराः भुवि जनाः मूर्खा इति ख्यापिता-
श्चान्ये वृत्तविखण्डिता बुधजनास्ते पामराः व्याहृताः ।
एके बुद्धिविवेकशून्यहृदयाः पाशव्यकोटिं गताः
विज्ञा ये हतवृत्तदम्भभरितास्ते के न जानीमहे ॥

९. विद्युल्लता

अज्ञानान्धविजृम्भितान् कलिमलान् सम्मोहयन्ती त्विषा
संदीप्ताऽखिलशब्दशास्त्रनिवहे लुप्ता क्वचिल्लक्षिता ।
सच्चित्प्रावृषि मोदधायिनि परब्रह्मैकसंह्लादिनी
राधा पातु मुकुन्दमेघपटले प्रोद्भासिविद्युल्लता ।

अस्तम्भूतदिवाकरे दिवि दिपद्ध्वान्तारुणे दिङ्मुखे
वारुण्यां किल कालभूधर इव व्याप्ताभ्रजाले क्वचित् ।
घस्रज्योतिमलीमसे त्विह लसद्ब्रह्माण्डभाण्डोदरे
रेखावत् खचिता मयाऽद्य गगने दृष्टा हि विद्युल्लता ॥

१०. वारिदाः

दिक्प्रान्तानननादयन् गिरितटानुल्लङ्घयन् रंहसा
द्राक् क्षोणीतलसंस्थितान् घनवनानाच्छादयन् मायया ।
प्रोषिद्भर्तृकदम्बकान् विधुमुखीसङ्घान् समुन्निद्रयन्
नीपान् कोरकसंहतिं प्रविकिरन् गर्जत्ययं वारिदः ॥१॥

सुतनु ! वदने ज्योत्स्नां धृत्वा तदा किल चन्द्रमाः
सपदि तव लावण्यं जेतुं समुत्सहते तदा ।
सततकृशतां क्लान्तिं प्राप्तस्त्वयोग्य इति क्रुधा-
श्चिकुरपटलीवर्णैश्छन्नः सुहृत्तव वारिदैः ॥२॥

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ३०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
१६.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	सूक्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २००।
२७.	नियतिचक्रम् (ध्वनिनाटकम्) (,, ,,)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा०रामकिशोर मिश्रः)	रु० १२.००
२९	लक्ष्मीशतकम्, (डा० वरदराजकण्णन्)	रु० २०.०।
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.
दूरभाषः : ५५३४९९